प्रकाशकः -
डॉ. दशरथः जादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, 2017*

प्रथमं संस्करणम् - जनवरी - २०१७

प्रतयः - ३५०

ISBN - 978-93-83097-19-7

मूल्यम् - रु. २५०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Shree Somanth Sanskrit University Grantha Series - 3

# Vākyārthajyotiḥ

Issue - 1 Year - 2014-15

Chief-Editor
**Prof. Ark Nath Chaudhary**

Editors
**Dr. Lalitkumar Patel**
**Dr. Janakisharan Aacharya**

Shree Somanth Sanskrit University - Veraval

Scanned by CamScanner

# वर्तमानसमये पर्यावरणसंरक्षणस्यावश्यकता तदर्थं वैदिकोपायाः

✍ डॉ. शत्रुघ्नपाणिग्राही

"तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम् ।[१]" इति शुक्लयजुर्वेदीयवचनानुसारं ज्ञायते अमूल्यमेतज्जीवनम् । शतं वर्षाणि वयं जीवेम इति सर्वे जनाः इच्छन्ति । प्रमुखरूपेण अस्मिन् जगति सर्वे जनाः स्वजीवने परमसुखं शान्तिं च प्राप्तुम् अभिलषन्ति । परन्तु तदर्थं सुखसाधनभूतानि कर्माणि अपेक्षन्ते । उचितेनानुचितेन वा केनापि प्रकारेण अहं लक्षाधीशः कोट्याधीशः भवामि इति चिन्ताधारा प्रायः सर्वत्र दरीदृश्यते । अनाचारेण, हिंसया, कपटेन, चौर्येण, लुण्ठनेन वा इदानीं जनाः धनोपार्जनं कुर्वन्ति । तस्मिन् प्रसङ्गे श्रूयते -

> पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
> पापस्य फलं नेच्छन्ति पापं कुर्वन्ति मानवाः ।

एतादृशानां विशृङ्खलानां मुख्यकारणं भवति कलुषितपर्यावरणम् । यतो हि अस्माकं परिवेशः इदानीं सम्पूर्णतया दूषितः ।

अद्य सकलं जगत् पर्यावरणसमस्यया आक्रान्तं वर्तते । कुत्रचित् चक्रवातः, क्वचित् सुनामिविनाशः, कुत्रचित् भूकम्पाः, ज्वालामुखिविस्फोटाः, हिमद्रवणम्, अतिवृष्ट्यादयः वा प्राकृतिकप्रकोपाः दरीदृश्यन्ते । एतासां समस्यानां समाधानार्थं वैदिकोपायाः एव राजन्ते । तदुक्तं यथा-

> वेदेषु संस्कृतिर्ज्ञेया वेदेषु विविधाः कलाः ।
> वेदेषु ज्ञेयं विज्ञानं वेदेषु किन्न विद्यते ॥

**पर्यावरणशब्दस्यार्थः (Meaning of Environment) -**

परि+आङ्+वृञ्+ल्युट् इत्यनेन निष्पन्नः पर्यावरणं शब्दः । परितः आवृणोति



यत् तत् पर्यावरणम् इति । कान्यावृत्ति इति चेत् अस्मान् परितः अर्थात् अस्मान् परितः यानि तत्त्वानि विराजन्ते तानि सर्वाणि पर्यावरणमिति नाम्ना ज्ञायन्ते । यथा वायुः, जलम्, भूमिः, वनस्पतयः, पशवः, पक्षिणः, जन्तवः, मनुष्याः चेत्यादयः । एतेषां तत्त्वानां समाहारः एव पर्यावरणम् ।

**पर्यावरणसंरक्षणस्यावश्यकता-**

प्रकृतेः सन्तुलनेनैव अस्माकं पर्यावरणं संरक्षितं भवति । प्राचीनकाले अस्माकं पर्यावरणं संरक्षितं सन्तुलितश्चासीत् । यदि काचन पर्यावरणीयसमस्या आयाति स्म तर्हि तासां समस्यानां समाधानं सर्वे ऋषयः वैदिकोपायेन कुर्वन्ति स्म । परन्तु सम्प्रति जनसङ्ख्यावृद्ध्या, उद्योगीकरणेन अन्यकारणेन च अस्माकं पर्यावरणं पूर्णरूपेण प्रदूषितमस्ति । सौरमण्डले पृथ्वी एकमात्रं ग्रहः अस्ति यत्र जीवनं भवति । यदि इयं पृथिवी नष्टा भविष्यति, जीवाय अनुपयुक्ता भविष्यति तर्हि जगति जीवानाभावः भविष्यति । अतः पर्यावरणसंरक्षणस्यावस्यकता विद्यते ।

**पर्यावरणे हानिकारकाणि मुख्यकारणानि -**

**जनसङ्ख्यावृद्धिः-** सर्वासां पर्यावरणीयसमस्यानां मूलं भवति जनसंख्यावृद्धिः । इदानीं जनसंख्यावृद्धिः द्रुतगत्या भवति । फलतः आवासादिविविधावश्यकतानां पूर्तये वनकर्तनं दिनानुदिनं भवति । अनेन पर्यावरणस्य ह्रासः, वन्यजीवानामभावः, जलवायुपरिवर्तनं, वर्षायाः अभावः भवति ।

**वायुमण्डलप्रदूषणम् -** वायोः संरचनायाम् ऑक्सीजनम् २०.९५ प्रतिशतं, नाइट्रोजेनम् ७८.०० प्रतिशतं, ओजनम् ०.९३ प्रतिशतं, कार्बन्डायक्साइड् ०.०४ प्रतिशतम्, अन्ये ०.०८ प्रतिशतं अस्ति । मनुष्याः विविधक्रियामाध्यमेन इमां संरचनां विखण्डितवन्तः । फलतः वायुप्रदूषणं जातम् ।

**ओजनस्तरस्य ह्रासः-** वायुमण्डले ओजनभ्रमकस्यावरणस्य निर्माणं प्राकृतिकी क्रिया वर्तते । ओजन इति आवरणं समतापमण्डले पृथ्वितः ३० किलोमीटर उपरि निवसति । इदं रक्षाकवचं भवति पृथिव्याः । इदमावरणं सूर्यकिरणात् समागतेभ्यः Ultra Violet किरणेभ्यः पृथिव्याः रक्षां करोति । परन्तु सम्प्रति शीतलभण्डाराणां वातानुकूलितयन्त्राणां प्रयोगेण च ओजनस्तरस्य ह्रासः भवति ।

**ध्वनिप्रदूषणम् -** सामान्यरूपेण औद्योगीकरणेन, सम्मर्देन, वाहनेन, मनोरञ्जनसाधनेन ध्वनिकारकैः ध्वनिप्रदूषणं जातमस्ति । अनेन त्रस्तजनः स्वभावेन

रूक्षः, बधिरः, उच्चरक्तचापेन पीडितः, मस्तिष्करोगग्रस्तः भवति ।

जलप्रदूषणम् - औद्योगिकजलस्रावेण, गृहोच्छिष्टेन जलेन अन्येन च अस्माकं भूगर्भजलभण्डारः प्रदूषितः भवति । फलतः बहवः रोगाः भवन्ति ।

वृक्षाभावः - अत्यधिकवृक्षच्छेदनं पर्यावरणदूषणस्य मुख्यकारणं भवति ।

औद्योगिकक्रान्तिः - स्वकीयावश्यकतायाः पूर्तये जनाः सदा प्रयतितवन्तः । प्रयासेन विविधप्रकारकस्य विज्ञानस्याविष्कारः जातः । फलतः देशेषु औद्योगिकक्रान्तिः आगता । अतः विश्वस्मिन् विश्वे विभिन्ना पर्यावरणसमस्या समुत्पन्ना ।

भू-प्रदूषणम् - अल्पेषु कृषिक्षेत्रेषु एव अधिकाधिकं शस्यानामुत्पादनं भवेत् तदर्थं जनाः क्षेत्रेषु विविधानां कीटनाशकौषधीनामुर्वरकाणाञ्च प्रयोगं कृतवन्तः । फलतः शस्यादिकमपि प्रदूषितं जातम् ।

समुद्रीयप्रदूषणम् - औद्योगीकरणेनापि समुद्रः प्रदूषितः भवति ।

अभाविदेवताः - विश्वं विष्णुकर्म । तत्रापि मध्यवर्तिशक्तिभूतानां देवतानां सुसम्पर्कात् विश्वस्थितिः सुदृढा । याः खलु देवताः एतस्मिन् असम्पृक्ताः ताः अभाविदेवताः कथ्यन्ते । यद्यपि ''हन्ताहमिमाः तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति'' छान्दोग्ये श्रूयते । तथापि एताः देवताः क्षुब्धाः सत्यः विष्णुसृष्टिं विनाशयितुं प्रवृत्ताः भवन्ति । यथा एते देवाः भवन्ति तेजः, जलम्, वायुश्च । यद्यपि एतासां देवतानां सत्ता भाविदेवतात्मिका तथापि क्षोभकारणात् एताः अभाविदेवतात्वेन परिचिताः भवन्ति ।

प्राकृतिकसंसाधनानामत्यधिकभोगः - इदानीं तेन त्यक्तेन भुञ्जीथा[३] इति भावना नास्ति । सर्वे प्राकृतिकसंसाधनानाम् अत्यधिकभोगं कुर्वन्ति येन पर्यावरणं दूषितं जातम् ।

पर्यावरणसंरक्षणे वैदिकोपायाः -

(क) वेदाः प्राकृतिकशक्तीः देवरूपाः स्वीकुर्वन्ति ।

यथा - अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थम् ऋग्यजुः सामलक्षणम् ॥[१] इति ।

वैदिकवाङ्मये एतानि सर्वाणि देवतात्वेन स्वीकृतानि । निरुक्तानुसारं तिस्र एव देवता भवन्ति ।[४] अग्निः वायुः सूर्यश्चेति । अर्थात् अस्य लोकस्य देवता अग्निः, अन्तरिक्षलोकस्य वायुः, द्युलोकस्य आदित्यः । एते त्रयो देवाः पर्यावरणसंरक्षणे



महत्त्वपूर्णभूमिकां निर्वहन्ति ।

सूर्यः - ऊर्जायाः अक्षयस्रोतोरूपः सूर्यः जीवजगतः आत्मरूपेण स्वीक्रियते ।[५] सूर्य एव सर्वेषु जीवेषु वनस्पतिषु च जीवनं सञ्चारयति, अतः स हरिकेश इति कथ्यते । हरिकेशः हरति दारिद्र्यमिति हरिः । हिरण्यवर्णाः केशाः केशस्थानीया ज्वाला यस्य सः इति महीधरः । अन्ये प्राच्यपाश्चात्यभाष्यकाराः हरिकेश इति शब्दस्यार्थं कुर्वन्ति विषनाशकः प्रदूषणनाशकः । हरति नाम विषस्य हरणं करोति, कथमितिचेत् स्वकीयज्वालयेति । परिवेशे आगतानां समुत्पादितानां विषाणां नाशकः सूर्यः । श्रूयते शुक्लयजुर्वेदे यथा -

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ २ ॥ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान् संपश्यन्विश्वा भुवनानि गोपाः ॥ इति ॥[६]

वायुः - शुद्धवायुः सर्वेषां व्याधीनां दूरीकरणे भेषजरूपेण कार्यं करोति । श्रूयते यथा -

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ इति ॥[७]

जलम् - जलमेव जीवनम् इति सर्वप्रसिद्धमस्ति । जले संसारस्य उद्भवः भवति पुनश्च महाप्रलये संसारः जले निमग्नः भवतीति भारतीयानां मतम् । Everything is originated by water and everything is sustained by water. According to Goeche । आपो वै ब्रह्म[८] इति शतपथब्राह्मणे श्रूयते । एतदर्थं यज्ञकर्मणि आदौ यजमानः गार्हपत्यागारे प्राङ्तिष्ठन्नाप उपस्पृशति । किमर्थम् इत्युक्ते अमेध्यो वै पुरुषो यदनृतं वदति, तेन पूतिरन्तरतः । मेध्या वा आपः । मेध्योभूत्वा व्रतमुपयानीति । पवित्रं वा आपः, पवित्रपूतोव्रतमुपयानीति । तस्माद्वा अप उपस्पृशति ।[९] जलस्य स्तुतिः कुत्रचित् देवीरूपेण भवति[१०] । कदाचित् मातृरूपेण भवति ।[११] शुद्धजलं मानवजीवनस्य प्राणभूतम् इति श्रूयते यजुर्वेदे यथा-

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥[१२] इति ।

प्रकृतिः एव देवता इति श्रूयते यजुर्वेदे । यथा - ओम् अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽदित्या देवता मरुतो देवता विश्वेदेवा

देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥

(ख) वृक्षेषु ईश्वरभावना -

शुक्लयजुर्वेदे शतपथब्राह्मणे च वृक्षाः वनस्पतयः शिवरूपाः इति कथिताः । यथा - नमो वृक्षेभ्यो हरिकेशेभ्यः । श्रीसूक्ते बिल्ववृक्षस्य स्तुतिः देवत्वेन भवति । वेदे वृक्षेषु चेतनतायाः वर्णनं दृश्यते । अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः इति मनुना प्रोक्तम् । वृक्षेषु ब्रह्म वर्तते इति श्रूयते अथर्ववेदे यथा - वृक्षो महद् ब्रह्म । इति । वृक्षच्छेदने ब्रह्मच्छेदनम् इति अभिलषति मनुः । यथा - इन्धनार्थमशुष्काणां द्रुमाणामवपातनम् । आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥ इति । वृक्षाः प्रदूषणं नाशयन्ति - इत्यस्य प्रमाणमपि दृश्यते ऋग्वेदे । एकस्य वृक्षस्य दशपुत्रैः सह तुलना भवति । यथा -

> दशकूपसमो वापी दशवापीसमो ह्रदः ।
> दशह्रदः समः पुत्रो दशपुत्रसमो द्रुमः ॥ इति ।

वृक्षाः ... इति श्रूयते यजुर्वेदे यथा -

> ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
> अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ इति ।

(ग) प्राकृतिकसंसाधनानां त्यागपूर्वकं भोगः -

> ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
> तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ इति ।

अर्थात् सर्वत्र ईश्वरस्य सत्ता विद्यते । ईश्वरेण सृष्टमिदं जगत् ईश्वर एव इति भावनया यदि वयं प्रकृतेः उपभोगं कुर्मश्चेत् परिवेशप्रदूषणं नैव भविष्यति । अथर्ववेदेऽपि श्रूयते - माता भूमिः पुत्रो अहं पृथिव्याः ।

(घ) यज्ञसम्पादनम् -

वेदः भवति यज्ञप्रधानः । यज्ञसम्पादनार्थमेव वेदस्याविर्भावः । यदा यज्ञे घृताहुतिभिः अग्निशिखाः निर्गच्छन्ति तदा घृतादिद्रव्याणि वायुरूपेण उपरि गच्छन्ति तदा तस्य सूक्ष्मकणाः तडिच्छक्तियुक्ताः भवन्ति । आकाशे स्थितानां धूलिकणानां ... संयोगेन या तडिच्छक्तिः सञ्चिता भवति तेन मेघानां सृष्टिर्भवति । अतः मनुना उक्तम् -



> अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
> आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥ इति ।

यज्ञेन अस्य विश्वस्य पालनं भवति । भोजनस्तरस्य वृद्धिं करोति ।

पर्यावरणसंरक्षणाय यज्ञस्य महत्त्वपूर्णं स्थानं विद्यते इति भगवता श्रीकृष्णेन गीतायां प्रोक्तम् -

> अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
> यज्ञाद् भवति पर्जन्यो यज्ञकर्मसमुद्भवः ॥ इति ।

(ङ) आन्तरिकवातावरणशुद्धिः- अथर्ववेदे भूमिसूक्ते श्रूयते -

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति । इति । अर्थात् एते गुणाः अपि पर्यावरणसंरक्षणार्थम् अपेक्षन्ते । ऋग्वेदस्य संज्ञानसूक्तेऽपि पर्यावरणविचारधारा दरीदृश्यते ।

(च) अन्ये चोपायाः

१- पर्यावरणं प्रति जनजागृतिः ।
जनेभ्यः पर्यावरणीयसमस्यायाः ज्ञानप्रदानम् ।
प्रदूषणजन्यपरिणामविषये जनाः अवबोधनीयाः ।
स्वयंसेवी संस्था प्रोत्साहनीया ।

२- पर्यावरणीयशिक्षायाः औचित्यम् ।
पाठ्यक्रमे व्यवस्थितपर्यावरणशिक्षायाः व्यवस्था करणीया ।
सर्वेषां कृते आवश्यकोपयुक्तसामग्रीणां चयनं करणीयम् ।

३- सर्वकारस्य उत्तमा नीतिः ।
प्रदूषणकारिणां कृते कठोरदण्डव्यवस्था।
विश्वस्तरे चिन्तनीयम् ।
क्षेत्रीयस्तरे वृक्षारोपणकार्यक्रमः करणीयः ।

४- मानसिकतायाः परिवर्तनम् ।
अहम् एकाकी बृहदाकारस्य पर्यावरस्य संरक्षणं कथं कर्तुं शक्नोमीति भावना ।
उत्तरदायित्वस्य ज्ञानप्रदानम् ।

५- पर्यावरणस्य क्षेत्रे प्रशिक्षणम् ।

६- पर्यावरणस्य क्षेत्रे अनुसन्धानम् ।

७- पर्यावरणसाहित्यनिर्माणं तद्वितरणं च ।

८- जनसंख्यावृद्धेः नियन्त्रणम् ।

९- पर्यावरणीया प्रतियोगिता ।

१०- सूचनायाः (मिडिया) भूमिका ।

निष्कर्षरूपेण वक्तुं शक्नोमि यत् अस्याः समस्यायाः मुख्यसमाधानं विद्यते आधिक्येन वृक्षाणां रोपणम् । वृक्षाणां कर्तने प्रतिबन्धः करणीयः । प्रकृतिं प्रति प्रेमभावः रक्षणीयः । वैचारिकप्रदूषणात् मुक्तिः स्थापनीया । गृहस्थाश्रमे यज्ञसम्पादनं च अवश्यं करणीयम् । अनेन अस्माकं पर्यावरणस्य सुरक्षा भविष्यति वयमपि सुरक्षिताः भविष्यामः इति ।

***

## पादटिप्पणय

१. शुक्लयजुर्वेदः काण्वशाखा - ३६/२४
२. शुक्लयजुर्वेदः - ४०/१
३. मनुस्मृतिः - १/२३
४. निरुक्तम् - ७/२
५. सूर्य आत्मा जगतस्तस्थुषश्च - शुक्लयजुर्वेदः - ७/४२
६. शुक्लयजुर्वेदः - १७/५८
७. ऋग्वेदः - १०/१३७/३
८. शतपथब्राह्मणम् - ३/३/१
९. शतपथब्राह्मणम् - १/३/१
१०. आपो न देविस्प यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।
प्राचैर्देवासः प्रणयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ।। - अथर्ववेदः - २०/२५/२
११. आपो अस्मान्मातरः शुन्धयन्तु ----- ।। - यजुर्वेदः - ४/२
१२. शुक्लयजुर्वेदः - ११/५०-५२
१३. शुक्लयजुर्वेदः १४/२०
१४. शुक्लयजुर्वेदः - १६/४०
१५. आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
ऋग्वेदस्य परिशिष्टभागम् - ५/८७/६
१६. ओषधे त्रायस्व । तै.सं. - १/२/१/१ १७. अथर्ववेदः - १/३२/१
१८. मनुस्मृती - ११/६३
१९. मा काकम्बीरमुद् वृहो वनस्पतिमशस्तीर्वि हि नीनशः । ऋग्वेदः - ६/४८/१७
२०. हिमाद्रि - १३
२१. शुक्लयजुर्वेदः - १२/७७
२२. ईशोपनिषद् - १
२३. अथर्ववेदः - १२/१२
२४. मनुस्मृतिः - ३/६६
२५. श्रीमद्भगवद्गीता - ३/१४
२६. अथर्ववेदः - १२/१
२७. ऋग्वेदः - १०/१९१/४

* *



Scanned by CamScanner